चतुर्थभागः

एकादशः पाठः

# ११. परिचिन्तय स्वयम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. युवकः कुत्र अस्ति?
२. व्याघ्रस्य हस्ते किम् अस्ति?
३. अनेन चित्रेण भवान् किम् अवगच्छति? स्वीयवाक्यैः वदतु?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

एकः पण्डितः अरण्यमार्गेण स्वग्रामं गच्छन् आसीत्। सः अरण्ये कञ्चन व्याघ्रं दृष्ट्वा भीतः वृक्षेषु निलीयते स्म। व्याघ्रः तस्य वेषं दृष्ट्वा पण्डितः इति मत्वा .....

व्याघ्रः - "भोः पण्डित! भयं मास्तु। अहं वृद्धः। चलितुमेव न शक्नोमि। भवतः अपकारं न करोमि। मम हस्ते किञ्चन स्वर्णकङ्कणम् अस्ति। मम प्रश्नानां समाधानानि दत्त्वा एतं कङ्कणं नयतु" इति उक्तवान् ।

पण्डितः - (सः चतुरः पण्डितः प्रश्नानां समाधानानि दातुम् ऐच्छत्) "अस्तु, पृच्छतु"।

व्याघ्रः - **श्लो॥ त्रिनेत्रोऽपि शिवो नास्मि घटो नास्मि जलान्वितः।**
**कूर्चश्मश्रुयुतो नित्यं नरो नास्मि ब्रवीतु माम्॥**

पण्डितः - नारिकेलम्।

व्याघ्रः - उत्तमम्। अन्यं प्रश्नं पृच्छामि।

**श्लो॥ मेघश्यामोऽस्मि न कृष्णो महाकायो न पर्वतः।**
**बलिष्ठोऽस्मि न भीमोऽस्मि कोऽस्म्यहं नासिकाकरः॥**

पण्डितः - हस्ती।







SCERT TELANGANA




व्याघ्रः - बहु उत्तमम्। अन्यः प्रश्नः।

**श्लो॥ स्वच्छाच्छवदनं लोकाः द्रष्टुमिच्छन्ति मे यदा।**
**तत्रात्मानं हि पश्यन्ति खिन्नं भद्रं यथायथम्॥**

पण्डितः - दर्पणम्।

व्याघ्रः - भवान् चतुरः अस्ति। अन्यम् एकं प्रश्नं पृच्छामि।

**श्लो॥ एकचक्षुः न काकोऽयं बिलमिच्छन् न पन्नगः।**
**क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥**

पण्डितः - सूची।

व्याघ्रः - साधु साधु। अन्यः प्रश्नः -

**श्लो॥ अपदो दूरगामी च साक्षरो न च पण्डितः।**
**अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥**

पण्डितः - लेखपत्रम् (इत्येवं समाधानानि वदन् सः पण्डितः पृष्ठतः गच्छन् आसीत्)

व्याघ्रः - भोः पण्डित! भवान् बहु बुद्धिमान्। विना विलम्बं समाधानानि वदति। भवतः समाधानैः अहम् अत्यन्तं सन्तुष्टः। शीघ्रं समीपमागत्य एतं स्वर्णकङ्कणम् स्वीकरोतु।

पण्डितः - "भोः व्याघ्र! जानामि इति कृत्वा भवतः प्रश्नानां समाधानानि दत्तवान्। अहं लोभी नास्मि। 'स्वार्जितम् एव अनुभोक्तव्यम्' इति पितृवचनमेव अनुपालयामि।" (इति उक्त्वा पण्डितः ततः वेगेन निर्गतवान्।)





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठे कयोः सम्भाषणम् अस्ति?

आ. व्याघ्रः कीदृशः?

इ. पण्डितः किमर्थं भीतः?

ई. पण्डितः किमुक्त्वा अरण्यात् निर्गतवान्?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. श्लोकान् गायन्तु, कण्ठस्थीकुर्वन्तु।

आ. प्रहेलिकानां भावम् अवगच्छन्तु।

1. మూడు కన్నులున్న వాడినైనా శివుణ్ణి కాను. కుండను కాకపోయినా నీరున్నదానను. ఎల్లప్పుడు పీచు మీసాలు కలిగి వుంటాను. కాని మానవుణ్ణి కాను. నేనెవరిని?

2. మబ్బు వలె నల్లగా ఉన్నా కృష్ణుణ్ణి కాను. పెద్ద శరీరమున్నా కొండను కాను. బలవంతుడిని కాని భీముణ్ణి కాను, ముక్కు నా చేయి. మరి నేనెవరిని?

3. జనులు నాలో స్వచ్ఛమైన, శుభ్రమైన ముఖాన్ని చూడాలని అనుకుంటారు. కాని తమ ముఖాన్ని చూచుకునే వేళ బాధ గానో, శుభ్రంగానో ఎలా ఉన్నా ఉన్నది ఉన్నట్లు చూస్తారు. ఇంతకు నేనెవరిని?

4. కన్ను ఒక్కటే కాని కాకి కాదు. బిలంలో వుంటుంది కాని పాము కాదు. క్షీణిస్తూ, వృద్ధి చెందుతూ వుంటుంది. కాని చంద్రుడు కాదు. పైకి, క్రిందికి వెళ్తూ వుంటుంది కాని సముద్రం కాదు.ఏమిటది?

5. కాళ్లు లేకున్ననూ సుదూరం పయనిస్తుంది. అక్షరాలు కల్గివున్నా పండితుడు కాదు. ముఖం(నోరు) లేకున్నా స్పష్టంగా మాట్లాడేది ఏది? ఇది తెలిసినవాడు పండితుడు.

इ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् अवगच्छन्तु।

| | | | |
|---|---|---|---|
| एकाकी | कूर्चश्मश्रुः | बिलम् | गूढार्थम् |
| क्षीयते | सन्नद्धः | खिन्नम् | स्वार्जितम् |

SCERT TELANGANA

ई. पाठेऽस्मिन् 'न' इति पदं कतिवारम् आगतम्?

उ. 'मि' इत्यक्षरान्तपदानि पाठे अन्विष्य रेखाङ्कयन्तु।

उदा- इच्छामि।

ऊ. अत्र कानिचन पदानि दत्तानि सन्ति। पाठानुसारं तानि सम्बद्धपदस्य पुरतः लिखन्तु।

शिवः, साक्षरः, मेघश्यामः, घटः, दूरगामी, काकः, महाकायः, बलिष्ठः, नरः, पन्नगः, स्फुटवक्ता, चन्द्रः

| | | | |
|---|---|---|---|
| उदा : गजः | १. मेघश्यामः | २. महाकायः | ३. बलिष्ठः |
| लेखः | १.................. | २.................. | ३.................. |
| सूची | १.................. | २.................. | ३.................. |
| नारिकेलम् | १.................. | २.................. | ३.................. |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. पाठेऽस्मिन् वृद्धः कः?

२. पण्डितः कीदृशं वचनम् अनुपालयति?

३. व्याघ्रः पण्डितं कथं प्रशंसितवान्?



### आ. चिन्तयन्तु, लिखन्तु

१. यदि व्याघ्रः भवतः पुरतः अस्ति तर्हि भवान् किं करिष्यति - इति ऊहित्वा मातृभाषया लिखतु?

२. कथायाः घटनां लिखन्तु।

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. अधः पट्टिकायां पञ्चदशक्रियापदानि सन्ति। तानि अन्विष्य लिखन्तु।

| | | | |
|---|---|---|---|
| य | ग | त | र्त |
| इ | च्छ | म | ये |
| पृ | र | ति | न |
| क | वि | प | स्म |

१. ...............    ९. ................
२. ...............    १०. ...............
३. ...............    ११. ...............
४. ...............    १२. ...............
५. ...............    १३. ...............
६. ...............    १४. ...............
७. ...............    १५. ...............
८. ...............

## ५. व्याकरणांशाः



अ. अधः दत्तैः प्रश्नवाचकपदैः रिक्तस्थानानि पूरयन्तु।

कः, कुत्र, किमर्थं, किं, कदा, कीदृशः

१. एषः शालां गच्छति।    एषः .................. गच्छति?
२. एषः यानं चालयति।    एषः ..................  चालयति?
३. एषः शालां पठितुं गच्छति।    एषः ..................  गच्छति?
४. एषः छात्रः।    एषः ..................?
५. एषः उत्तमः छात्रः।    एषः .................. छात्रः?
६. एषः सायङ्काले आगच्छति।    एषः ..................  आगच्छति?

SCERT TELANGANA

**आ. एतानि वाक्यानि अवगच्छन्तु।**

| | |
|---|---|
| अहं कर्तुं शक्नोमि। | वयं कर्तुं शक्नुमः। |
| अहं पृच्छामि। | वयं पृच्छामः। |
| अहम् इच्छामि। | वयम् इच्छामः। |
| अहम् अस्मि। | वयं स्मः। |

एतानि क्रियारूपाणि वर्तमानकालस्य (लट्लकारस्य) उत्तमपुरुषस्य एकवचन-बहुवचनरूपाणि ।

**आ. अधः दत्तानि विभिन्नधातूनां वर्तमानकालस्य उत्तमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।**

| वर्तमानकाले- | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उत्तमपुरुषे | वदामि | वदावः | वदामः |
| | भवामि | भवावः | भवामः |
| | लिखामि | लिखावः | लिखामः |
| | नयामि | नयावः | नयामः |
| | गच्छामि | गच्छावः | गच्छामः |
| | यच्छामि | यच्छावः | यच्छामः |
| | खादामि | खादावः | खादामः |
| | पिबामि | पिबावः | पिबामः |
| | करोमि | कुर्वः | कुर्मः |
| | अस्मि | स्वः | स्मः |

## ६. सर्जनात्मकव्यक्तीकरणम्



**अ. एतानि पदानि पठन्तु।**

१. युतकम्  २. आसन्दः  ३. नयनम्

पाठे दर्शितया शैल्या एतेषाम् समस्याः रचयन्तु। मातृभाषया वदन्तु।

## ७. परियोजनाकार्यम्



**आन्ध्रभाषया निबद्धाः प्रहेलिकाः सङ्गृह्य अध्यापकस्य सहयोगेन तासां भावं ज्ञात्वा लिखन्तु। संस्कृतेन तेषाम् अनुवादं कुर्वन्तु। भित्तिपत्रेषु लिखित्वा लेपयन्तु।**

SCERT TELANGANA

## ८. प्रशंसा



रमेशः - भास्कर! अहं काश्चन प्रहेलिकाः पृच्छामि। समाधानानि वदति वा?

भास्करः - लघुवाक्यैः पृच्छतु।

रमेशः - तथैव। एकः दीर्घः गजः अस्ति। गजस्य चत्वारः पादाः सन्ति। चत्वारि शिरांसि सन्ति। परं तु पदमेकं न गच्छति।

भास्करः - मञ्चः, तल्पः,

रमेशः - उत्तमम्। अन्यत् पृच्छामि। सोदरीद्वयं निर्विरामं गणयति। किं तु प्रतिदिनं द्वादशस्थानानि एव गणयति। किम् एतत्?

भास्करः - घटिकासूच्यौ।

रमेशः - भवान् बहु मेधावी। विना विलम्बम् उत्तरं ददाति (इति हस्तचालनं करोति)

(भवतः कक्ष्यायां स्थितम् एतादृशं बालकम् उद्दिश्य वदतु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. प्रहेलिकानां भावं वक्तुं शक्नोमि । | | | |
| ३. कथायाः घटनां लेखितुं शक्नोमि । | | | |
| ४. सूचनानुसारं प्रहेलिकाः रचयितुं शक्नोमि । | | | |

**न मातुः परदैवतम्**

SCERT TELANGANA